# Shri Vyasa Namavali Stotram

# શ્રીવ્યાસનામાવલીસ્તોત્રમ્

## Document Information

Text title : Shri Vyasa Namavali Stotram

File name : vyAsanAmAvalIstotram.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : May 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Shri Vyasa Namavali Stotram

# શ્રીવ્યાસનામાવલીસ્તોત્રમ્

ઈશિતા શ્રુતિભર્તાચ ભુવન પ્રભુરેવ ચ ।
જગદ્ગુરુઃ સદ્ગુરુશ્ચ મુનિવંશસ્ય શેખરઃ ॥ ૧॥

ભગવત્તમો વેદરાટ્ ચ તથા સત્યવતીસુતઃ ।
શ્રુતીશ્વરો નીલભાશ્ચ પારાશર્યો મહાપ્રભુઃ ॥ ૨॥

વેદવ્યાસઃ સત્પતિશ્ચ દ્વિજેન્દ્રાન્વયજસ્તથા ।
જગત્પિતાજિતશ્ચૈવ મુનીન્દ્રોવેદનાયકઃ ॥ ૩॥

દેવતાપૂજ્યચરણશ્ચામ્નાયાનાં સુપાલકઃ ।
ભારતાનાં વરગુરુઃ બ્રહ્મસૂત્રપ્રણાયકઃ ॥ ૪॥

દ્વૈપાયનો મધ્વનાથો જ્ઞાનસૂર્યઃ સદિષ્ટદઃ ।
વિદ્યાપતિઃ શ્રુતિપતિઃ વિદ્યારાજો ગિરાં પ્રભુઃ ॥ ૫॥

વિદ્યાધિરાજો વેદેશસ્તથા વેદપતિઃ સ્વભૂઃ ।
વિદ્યાધિનાથો વેદરાટ્ તથામ્નાય વિકાસકઃ ॥ ૬॥

વિદ્યાધીશઃ શ્રુતીશશ્ચ શ્રુતિપઙ્કજ ભાસ્કરઃ ।
કૃષ્ણદ્વૈપાયનો વ્યાસો ભક્તચિન્તામણિસ્તથા ॥ ૭॥

મહાભારત નિર્માતા કવીન્દ્રો બાદરાયણઃ ।
સ્મૃતિમાત્રાર્તિહા ચૈવ ભક્તવિત્રાસહા તથા ॥ ૮॥

વિશ્વવેત્તા વિશ્વપતિર્ભક્તા જ્ઞાન વિનાશકઃ ।
વિઘ્નૌઘધ્વાન્તતરણિર્વિઘ્નાટવ્યાશ્ચ હવ્યવાટ્ ॥ ૯॥

વિઘ્નવ્યાલ વિપશ્ચૈવ વિઘ્નૌઘ ઘન મારુતઃ ।
વિઘ્નર્ભ પઞ્ચાનનશ્ચ વિઘ્નપર્વત સત્પવિઃ ॥ ૧૦॥

વિઘ્નાબ્ધિકુમ્ભજશ્ચૈવ વિઘ્નતૂલ સરાગતિઃ ।
બાદરિર્જૈમિનિશ્ચૈવ સુમન્તુર્વૈશમ્પાયનઃ ॥ ૧૧॥

આત્મરથ્યશ્ચ પૈલશ્ચ કાશકૃત્સ્નશ્ચ લોમશઃ ।
કાર્ષ્ણાજિનિશ્ચૌડુલોમિરાત્રેયો રોમહર્ષણઃ ॥ ૧૨॥

ઇત્યેતે મુનયઃ શિષ્યા યસ્યાસૌ મુનિશેખરઃ ।
બ્રહ્માદ્યૈઃ પ્રાર્થિતો વિષ્ણુઃ સત્યવત્યાં પરાશરાત્ ॥ ૧૩॥

પ્રાદુર્ભૂતો વ્યાસરૂપી વેદોદ્ધારકસ્તથા ।
વિજ્ઞાનરોચિષા પૂર્ણો બ્રહ્માણ્ડાન્તર્બહિસ્તથા ॥ ૧૪॥

યોગિમાનસ કઞ્જસ્થઃ હરિતોપલસન્નિભઃ ।
ભક્તાજ્ઞાન સુસંહારી તર્ક મુદ્રાયુતઃ કરે ॥ ૧૫॥

દક્ષિણે ભવભીતાનાં ભવનાશાય મુદ્રયા ।
અભયાખ્યયા યુતઃ સવ્યે કરે સન્મઙ્ગલપ્રદઃ ॥ ૧૬॥

પ્રાજ્ઞમૌલિશ્ચ પુરુધીઃ સુખકાન્તિર્વિબોધ ભાઃ ।
શતેન્દ્વધિક સત્કાન્તિરયોગ્ય જનમોહકઃ ॥ ૧૭॥

શુક્લરક્ત વિદૂરશ્ચ બ્રહ્માદ્યૈર્વર્ણમાનિભિઃ ॥

સંસ્તુતાનન્દ સુગુણો યોગીન્દ્રઃ પદ્મજાર્ચિતઃ ॥ ૧૮॥

આચાર્યવર્યો વિપ્રાત્મા પાપનાશનનામવાન્ ।
વેદાન્તકર્તા ભક્તાનાં કવિતાધિગુણપ્રદઃ ॥ ૧૯॥

વાદે વિજયદશ્ચૈવ રણે ચ વિજયપ્રદઃ ।
કીટરાજ્યપ્રદઃ કીટમોક્ષદાતા ચ સત્પ્રભુઃ ॥ ૨૦॥

આમ્નાયોદ્ધારકશ્ચૈવ તથા સત્પુરુવંશકૃત્ ।
મુનેઃ શુકસ્ય જનકો જનકસ્યોપદેશકઃ ॥ ૨૧॥

માતુઃ સ્મ્યત્યૈવાગમન વરદાતેશ્વરેશ્વરઃ ।
યમુનાદ્વીપ સુજનિર્યમુનાદ્વીપ ભાસકઃ ॥ ૨૨॥

માત્રાજ્ઞાપાલનાર્થાય ભગવાન્ પુરુષોત્તમઃ ।
ધૃતરાષ્ટ્ર પાણ્ડુ વિદુરજનકો જ્ઞાનદસ્તથા ॥ ૨૩॥

ઉગ્રરૂપઃ શાન્તરૂપોચિન્ત્યશક્તિઃ પરાત્પરઃ ।
પાણ્ડવાનાં દુઃખહન્તા તથાપરિમિતાન્તરઃ ॥ ૨૪॥

હિડિમ્બાસઙ્ગ્રહાર્તાય ભીમાજ્ઞા સંપ્રદાયકઃ ।

શાક્તઃ કાનીન ઇન્દ્રશ્ચ શાસ્ત્રકૃદ્ધરિરેવ ચ ॥ ૨૫॥

દ્વિષામજ્ઞાનપાપાનામતિસઙ્ક્રામકસ્તથા ।
કર્મ બન્ધ સુભેત્તા ચ મુક્તાનાં સ્વાત્મવાહકઃ ॥ ૨૬॥

વાસવી હૃદયાનન્દ વેદશાસ્ત્ર પ્રણાયકમ્ ।
વેદવ્યાસં ગુરૂપાસ્યં વન્દેભિષ્ટપ્રદાયકમ્ ॥ ૨૭॥

(ન્યાયામૃત પ્રકાશઃ)

ઇતિ શ્રીબિદરહળ શ્રીનિવાસતીર્થકૃતં શ્રીવ્યાસનામાવલિસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Krishnananda Achar

*Shri Vyasa Namavali Stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*